
# ५ पञ्च शीलानि आचरेम, आदर्शसमाजं रचयेम



**वसुधारा** – अयि मैत्रेय! साञ्चीस्तूपः किमर्थं प्रसिद्धः?

**मैत्रेयः** – ननु बौद्धधर्मस्य प्रसिद्धः स्मारकः भवति साञ्चीस्तूपः। सम्राट् अशोकः अस्य निर्माणं कारितवान्।

**अध्यापिका** – सौम्य मैत्रेय! यूनेस्कोद्वारापि साञ्चीस्तूपः वैश्विकसम्पद्-रूपेण उद्घोषितः। बौद्धधर्मस्य सिद्धान्तानां भगवतः गौतमबुद्धस्य उपदेशानाञ्च प्रचाराय एषः स्तूपः निर्मितः।

**तेञ्जिनः** – महोदये! किं गौतमबुद्धस्य उपदेशाः आधुनिककालेऽपि उपयोगिनः सन्ति?

**अध्यापिका** – पुत्र तेञ्जिन! गौतमबुद्धस्य उपदेशाः सार्वकालिकाः सार्वभौमिकाश्च सन्ति। सांसारिकं मोहमायादिकम् अविगणय्य घोरतपसा समुदितबोधः गौतमः भगवान् बुद्धः अभवत्। असौ करुणायाः प्रतिमा आसीत्।

**अरुणा** – मान्ये! वयं भगवतः बुद्धस्य कथाम् उपदेशान् च ज्ञातुम् उत्सुकाः स्मः। कृपया श्रावयतु।

© NCERT not to be republished

**अध्यापिका** – अरुणे! जातकमालायां बुद्धस्य कथाः विलसन्ति। प्रथमम् अहं जातकमालायाः व्याघ्री-जातकतः बुद्धस्य करुणापूर्णां कथामेकां श्रावयामि। अनन्तरं तस्य जीवनोन्नयकरान् उपदेशान् श्रावयामि।

**लावण्या** – एवं तर्हि वयम् अत्रैव तरुतले उपविश्य सादरं शृण्मः।


**अध्यापिका** – अवश्यम्!

बोधिसत्त्वः कारुणिकः स्वसत्कर्मणां बलेन एकस्मिन् कुलीनपरिवारे जन्म अलभत। जातकर्मादिभिः कृतसंस्कारक्रमः अभिवर्धमानोऽसौ प्रकृतिमेधावित्वात् ज्ञानकौतूहलात् अकौसीद्याच्च अचिरेण अष्टादशविद्यास्थानेषु सकलासु स्वकुलक्रमाविरुद्धासु कलासु च पारङ्गतिं लब्धवान्। अयं धर्माभ्यासभावितमतिः कृतप्रव्रज्यापरिचयः बोधिसत्त्वः कदाचिदरण्ये अटन्नासीत्। तस्य स्नेहकरुणादिभावनाभिः हिंस्रका अपि जन्तवः कलहेन विना स्नेहेन चरन्ति स्म।




अथैकदा स्वशिष्येण अजितेन सह वनप्रान्ते भ्रमता बोधिसत्त्वेन काचिद् व्याघ्री अवलोकिता, या पर्वतगुहायां प्रसवपीडया क्लान्ता बुभुक्षया कृशोदरा दुर्बलनेत्रा च आसीत्। अनन्यगतिका सा क्षुत्पीडां निवारयितुं स्वपुत्रानपि हन्तुमुद्यमते स्म।

करुणासागरः बोधिसत्त्वः इमां घटनां वीक्ष्य ससम्भ्रमं शिष्यमवोचत् - तच्छीघ्रमन्विष्यतां तावत्कुतश्चिदस्याः क्षुद्दुःखप्रतीकारहेतुः यावन्न तनयानात्मानं चोपहन्ति। अजितस्य गमनानन्तरं बोधिसत्त्वः अचिन्तयत् – मम सम्पूर्णे शरीरे विद्यमाने सति कथमहमन्यस्य प्राणिनः मांसमानयामि? अन्यस्य प्राणिनः मांसस्य प्राप्तिः भविष्यति इति निश्चितिरपि नास्ति। कदाचित् तावता कालेन सा पुत्रान्न खादेत् मरणं वा न प्राप्नुयात्। मम आत्मा अमरः। शरीरमनित्यं जडञ्च। परोपकारार्थमिदं शरीरम् इति तर्कयन् सः अहं स्वप्राणरहितेन गात्रेण पुत्रवधरूपात् पापाद् व्याघ्र्याः संरक्षणं करोमि इति निश्चित्य योगबलेन प्राणान् अत्यजत्। ततः बोधिसत्त्वस्य तनुः गुहायाः भूमौ सशब्दं पतिता।



स्वपुत्रहिंसायाः उद्यमाद् विरता व्याघ्री बोधिसत्त्वस्य जडं शरीरमभक्षयत्। एतादृशः जीवमात्रे दयालुः बोधिसत्त्वः एव परस्मिन् जन्मनि कारुण्यमूर्तिः भगवान् बुद्धः इति रूपेण जगत्कल्याणं तनुते स्म। भगवान् बुद्धः एव बौद्धधर्मस्य प्रवर्तकः। सः जनानां दुःखनिवारणाय चत्वारि आर्यसत्यानि अष्टाङ्गमार्गं च उपदिष्टवान्।




स बुद्धः गृहस्थानां नैतिकजीवनस्य निर्वाहणाय पञ्चशीलानि अपि उपदिष्टवान्। तानि—

**पाणातिपाता वेरमणिसिक्खापदं समादियामि।**

अहं कस्यापि जीवस्य वधं न करिष्यामि इति सङ्कल्पं स्वीकरोमि।

**अदिन्नादाना वेरमणिसिक्खापदं समादियामि।**

अहं चौर्यं न करिष्यामि इति सङ्कल्पं स्वीकरोमि।

**कामेसु मिच्छाचारा वेरमणिसिक्खापदं समादियामि।**

अहं व्यभिचारस्य आचरणं न करिष्यामि इति सङ्कल्पं स्वीकरोमि।

**मुसावादा वेरमणिसिक्खापदं समादियामि।**

अहम् मिथ्या न वदिष्यामि इति सङ्कल्पं स्वीकरोमि।

**सुरामेरय-मज्ज-पमादट्ठाना वेरमणिसिक्खापदं समादियामि।**

अहं मद्य-मादक-द्रव्याणां प्रमादसाधनानां च सेवनं न करिष्यामि इति सङ्कल्पं स्वीकरोमि।

संसारे शान्तिमयं जीवनं यापयितुं वयं बौद्धधर्मस्य पञ्चशीलानि आचरेम तेन च आदर्शसमाजं रचयेम।

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| स्तूपः | बौद्धानां स्मृतिस्थलम् | स्तूप, महात्मा बुद्ध या बौद्ध भिक्षुओं के अवशेषों (अस्थियों) को सुरक्षित रखने या उनकी स्मृति में बनाए गए पवित्र स्मारक | sacred monuments built to preserve the relics (bones) of mahatma buddha or buddhist monks | |
| वैश्विकसम्पद् | विश्वस्य सम्पत् | समस्त विश्व की साझी संपत्ति या धरोहर | global herit-age/wealth | |
| सार्वकालिकाः | सर्वेषु कालेषु उपयोक्तुं शक्याः | जो सदैव प्रासंगिक हो | timeless / eternal | |
| सार्वभौमिकाः | सर्वेषु स्थलेषु उपयोक्तुं शक्याः | जो संपूर्ण विश्व, सभी समाजों और मानवमात्र पर समान रूप से लागू होता हो | universal | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| बोधिसत्त्वः (बहुव्रीहिः) | बोधिः सत्त्वं यस्य सः | भगवान् बुद्ध | the lord buddha | |
| अभिवर्धमानः (अभि+√वृध्, शानच्) | वर्धनशीलः | बढ़ता हुआ | growing up | |
| प्रकृतिमेधावित्वात् (तृतीयातत्पुरुषः) | प्रकृत्या मेधावी, तस्य भावः, तस्मात् | स्वाभाविक बुद्धिमत्ता से | due to natural intelligence | |
| अकौसीद्यात् (नञ् तत्पुरुषः) | न कौसीद्यं, तस्मात् | आलस्य न होने के कारण | due to lack of laziness | |
| ज्ञानकौतूहलात् (षष्ठीतत्पुरुषः) | ज्ञानस्य कौतूहलं, तस्मात् | ज्ञान की जिज्ञासा से | out of curiosity for knowledge | |
| स्वकुलक्रमाविरुद्धासु (षष्ठीतत्पुरुषः) | स्वकुलक्रमस्य अविरुद्धाः, तासु | कुल परंपरा के अनुकूल | consistent with family tradition | |
| विद्यास्थानेषु (षष्ठीतत्पुरुषः) | विद्यायाः स्थानानि, तेषु | विद्या के क्षेत्रों में | in branches of knowledge | |
| कृतप्रव्रज्यापरिचयः (बहुव्रीहिः) | कृतः प्रव्रज्या परिचयः येन सः | संन्यास से परिचित | familiar with renunciation | |
| नचिरेण (अव्ययम्) | शीघ्रमेव | शीघ्र ही / जल्द ही | soon / in no time | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| धर्माभ्यासभावितमतिः (बहुव्रीहिः) | धर्माभ्यासेन भाविता - धर्माभ्यासभाविता मतिः यस्य सः | धर्म के अभ्यास वाली बुद्धि | mind purified by religious practice | |
| अटन् (अट्, शतृ पु. प्र. ए. व ) | भ्रमन् | भ्रमण करता था | used to roam | |
| क्लान्ता | श्रान्ता | थकी हुई / व्याकुल | exhausted / weary | |
| क्षुत्पीडां (षष्ठीतत्पुरुषः) | क्षुदः पीडा | भूख की पीड़ा | hunger pangs | |
| उद्यमते | उद्यमं करोति | उद्यत होती है | ready | |
| ससम्भ्रमम् (अव्ययीभावः) | सम्भ्रमेण सह वर्तमानं | चिन्तित होकर | with concern | |
| जडम् | अचलम् | निर्जीव | non-living | |
| मृषावादात् (नित्यसमासः) | मृषा वादः तस्मात् | झूठ बोलने से | from speaking lies | |
| प्राणातिपातात् (षष्ठीतत्पुरुषः) | प्राणानाम् अतिपातः, तस्मात् | जीवहत्या से | from killing living beings | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

**पालिभाषायाः केचन नियमाः**

पालिभाषायाः केचन विशिष्टाः नियमाः सन्ति येषां कारणात् सा भाषा संस्कृतभाषातः भिन्ना भवति। संस्कृतभाषायाम् इव पालिभाषायां हलन्त-पदानि न भवन्ति। यथा संस्कृते आर्यसत्यम् इति पदं पालिभाषायाम् अरियसच्चं इति भवति।

संस्कृते स्वरवर्णात् पूर्वम् अनुस्वारः न भवति। पालिभाषायां स्वरवर्णात् पूर्वम् अनुस्वारः भवति। यथा—दुक्खं अरियसच्चं इति।

संस्कृते यदि विसर्गाद् अनन्तरं ह्रस्वः अ-वर्णः, अन्तःस्थवर्णाः, वर्गाणां तृतीय-चतुर्थ-पञ्चमवर्णाः अथवा ह-वर्णः उपस्थिताः सन्ति तर्हि विसर्गस्य ओ (ो) कारादेशः भवति। वाक्यस्य अन्ते विसर्गस्य ओ (ो) कारादेशः न भवति। पालिभाषायां तु सर्वथा विसर्गस्य (अः इत्यस्य) ओ (ो) कारादेशः भवति। यथा—सम्यक् सङ्कल्पः - सम्मासङ्कप्पो।

**चत्वारि आर्यसत्यानि**

१. **दुक्खं अरियसच्चं** – संसारः दुःखमयः अस्ति। जन्म जरा व्याधिः मरणं विप्रयोगः अप्रियसंयोगः इत्यादयः सर्वे दुःखस्वरूपाः भवन्ति।

२. **दुक्खसमुदयं अरियसच्चं** – तृष्णा (इच्छा आसक्तिः वा) एव दुःखस्य मूलकारणमस्ति।

३. **दुक्खनिरोधं अरियसच्चं** – तृष्णायाः नाशेन दुःखस्य निरोधः सम्भवति। एतदेव निर्वाणम् (मोक्षः) अस्ति।

४. **दुक्खनिरोधगामिनी पटिपदा अरियसच्चं** – या प्रतिपत् (मार्गः) दुःखनिरोधं प्रति नयति सा प्रतिपत् एव।

**अष्टाङ्गिकमार्गः**

१. सम्मादिट्ठि (सम्यक् दृष्टिः ) – वस्तूनां यथार्थज्ञानम्।

२. सम्मासङ्कप्पो (सम्यक् सङ्कल्पः) – शुद्धः हितकरः च विचारः।

© NCERT not to be republished

३. सम्मावाचा (सम्यक् वाक्) – सत्यं प्रियं हितं च वचनम्।

४. सम्माकम्मन्तो (सम्यक् कर्मान्तः) – सदाचारयुक्तानि कर्माणि।

५. सम्मा-आजीवो (सम्यक् आजीवः) – धर्मसम्मतः जीविकोपार्जनमार्गः।

६. सम्मावायामो (सम्यक् व्यायामः) – शुभकर्मणां साधनाय प्रयत्नः।

७. सम्मासति (सम्यक् स्मृतिः) – चित्तस्य जागरणम्।

८. सम्मासमाधि (सम्यक् समाधिः) – ध्यानेन चित्तस्य एकाग्रता।

शरणत्रयस्य सिद्धान्तः बौद्धधर्मस्य मूलभावनां प्रकटयति।

१. बुद्धं शरणं गच्छामि। २. धम्मं शरणं गच्छामि। ३. संघं शरणं गच्छामि।

अस्यार्थः अस्ति अहं बुद्धस्य (जागृतस्य गुरोः) शरणं गच्छामि। अहं धर्मस्य (सत्यस्य) शरणं गच्छामि। अहं संघस्य (भिक्षुसंघस्य) शरणं गच्छामि। करुणा मैत्री अहिंसा मध्यममार्गस्य आचरणं च बौद्धधर्मस्य नैतिकजीवनस्य मूलतत्त्वानि सन्ति।

© NCERT not to be republished

## अभ्यासाद् जायते सिद्धिः

१. **एकपदेन उत्तरं लिखत—**

(क) जातककथासु बुद्धस्य नाम किमासीत्?

(ख) का बुभुक्षिता आसीत्?

(ग) बोधिसत्त्वः कथं प्राणान् अत्यजत्?

(घ) बौद्धधर्मस्य प्रवर्तकः कः?

(ङ) बौद्धधर्मस्य प्रचाराय कस्याः भाषायाः उपयोगः जातः?

## २. पूर्णवाक्येन उत्तरं लिखत —

(क) हिंसकाः जन्तवः कथं चरन्ति स्म ?

(ख) बोधिसत्वेन व्याघ्री कदा अवलोकिता ?

(ग) बोधिसत्त्वः किं निश्चित्य योगबलेन प्राणान् अत्यजत् ?

(घ) जनानां दुःखनिवारणाय किम् उपदिष्टवान् ?

(ङ) पञ्चशीलानि किमर्थम् उपदिष्टवान् ?

## ३. कोष्ठकस्य पदानि उपयुज्य घोषवाक्यानि रचयत —

व्यायामः, भीतिः, साधनम्, आहारः, सृष्टिः

(क) सम्यक् दृष्टिः – सम्यक् ……सृष्टिः……।

(ख) शुद्धः …………………… – सर्वहितविचारः

(ग) सम्यक् स्मृतिः - परीक्षायां नश्यति ……………………

(घ) सत्यं वचनम् - दृढतायाः……………………।

(ङ) सम्यक्…………………… – स्वास्थ्यरक्षानियमः।




## ४. रेखाङ्कितं पदम् आदाय प्रश्ननिर्माणं कुरुत —

(क) अहं **जीवस्य** वधं न करिष्यामि। ……………………………………

(ख) **छात्रः** चौर्यं न करिष्यति। ……………………………………

(ग) सामाजिकः **व्यभिचारं** न करिष्यति। ……………………………………

(घ) **शिशवः** असत्यं न वदिष्यन्ति। ……………………………………

(ङ) अहं **मद्य–मादक–द्रव्याणां प्रमादसाधनानां** च सेवनं न करिष्यामि। ……………………

## ५. सन्धिविच्छेदं कुरुत —

(क) अधुनापि – …………………… + ……………………

(ख) आधुनिककालेऽपि – …………………… + ……………………

© NCERT not to be republished

(ग) परोपकारार्थम् – ............+...........

(घ) सदाचारः – ............+...........

(ङ) अत्रैव – ............+...........

### ६. समस्तपदस्य विग्रहं लिखत—

(क) मधुरव्यवहारः – ........................

(ख) धर्मसम्मतः – ........................

(ग) असत्यम् – ........................

(घ) कृतप्रव्रज्यापरिचयः – ........................

(ङ) परोपकारार्थम् – ........................



## स्वाध्यायान्मा प्रमदः

### बौद्धधर्मस्य परिचयः

बौद्धधर्मस्य प्रवर्तकः गौतमबुद्धः। सः पालिभाषाम् उपयुज्य बौद्धधर्मस्य प्रचारं कृतवान्। सत्यम्, अहिंसा, करुणा, परोपकारः, सद्व्यवहारः, सामाजिकता, निर्वाणे सर्वाधिकारः इत्यादि-मानवमूल्यानां विकासे बौद्धधर्मस्य महद् योगदानं वर्तते। अनुयायिनां संख्यादृष्ट्या सम्प्रति विश्वस्य चतुर्थः धर्मः भवति बौद्धधर्मः। चीन-जापान-वियतनाम-दक्षिणकोरिया-कंबोडिया-थाईलैंड-म्यांमार-भूटान-श्रीलङ्कादिषु देशेषु बौद्धधर्मस्य व्यापकता अनुभूयते। बौद्धानां प्रमुखः धर्मग्रन्थः भवति *त्रिपिटकम्*। *सुत्तपिटकं विनयपिटकम् अभिधम्मपिटकं* चेति। *सुत्तपिटके* बुद्धस्य उपदेशाः सन्ति। *विनयपिटके* भिक्षूणामाचरणं मठानां नियमाश्च सन्ति। *अभिधम्मपिटके* दार्शनिकाः विचाराः प्रतिपादिताः। आर्यशूरेण रचितायां जातकमालायां *व्याघ्रीजातकम्, शिबिजातकम्, कुल्माषपिण्डिजातकम्, शतपत्रजातकम्* इत्यादीनि चतुस्त्रिंशत् जातकानि सन्ति। अश्वघोषः संस्कृतभाषया *बुद्धचरितं सौन्दरानन्दमहाकाव्यं* च विरचितवान्।

### विपश्यना (विपस्सना)

विपश्यना इति संस्कृतपदं पालिभाषायां विपस्सना इति उच्यते। 'वि' (विशिष्टं) उपसर्गेण सह दृश्-धातोः (पश्यना-दर्शनम्) विपश्यना इति पदं निर्मीयते, यस्य शाब्दिकः अर्थः भवति "वस्तूनां यथार्थरूपेण दर्शनम्"

© NCERT not to be republished

इति। भगवता बुद्धेन आविष्कृता प्राचीना ध्यानपद्धतिः अस्ति विपश्यना, यस्याः मूलम् आत्मनिरीक्षणे निहितम्। अस्यां साधकः स्वस्य श्वासप्रश्वासानां (आनापानसति) शरीरस्य विविधानां वेदनानां च तटस्थभावेन निरीक्षणं करोति।

## यस्तु क्रियावान् मनुजः स विद्वान्

१. जीवकारुण्यम् इति विषये कक्षायाम् एकस्य लघुनाटकस्य अभिनयः करणीयः।

२. प्रसिद्धानां बौद्धमठानां विश्वविद्यालयानां च विषये सचित्रं संक्षिप्तम् एकं परियोजनाकार्यं रचयत।

३. भगवतः बुद्धस्य जीवनप्रसङ्गैः सम्बद्धानि प्रमुखानि चत्वारि तीर्थस्थानानि अधोनिर्दिष्टानि पूरयत।

(**सङ्केतः** —कुशीनगरम् , लुम्बिनी, सारनाथः, बोधगया)

| क्षेत्रम् | महत्त्वम् | स्थानम् |
|---|---|---|
| नेपालदेशः | भगवतः बुद्धस्य जन्मस्थानम् | |
| बिहारराज्यम् (भारतम्) | ज्ञानप्राप्तिस्थानम् (सम्बोधनम्) | |
| उत्तरप्रदेशः (भारतम्) | प्रथम-धर्मोपदेशस्थानम् (धर्मचक्रप्रवर्तनम्) | |
| उत्तरप्रदेशः (भारतम्) | महापरिनिर्वाणस्थानम् (देहत्यागः) | |

© NCERT not to be republished